नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions — 25

# VU—87–Sahit. Shas.

No. of Printed Pages — 3

# वरिष्ठ उपाध्याय परीक्षा, 2013

## साहित्य-शास्त्रम्

समय : $3\frac{1}{4}$ घंटे

पूर्णांक : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामाङ्कः अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि ।

(4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया ।

(5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः ।

1. यक्ष: कदा मेघमाश्लिष्टसानुं ददर्श ? 1
2. अनुकूल: पवन: कथं मेघं नुदति ? 1
3. आखण्डलस्य धनु: खण्डं कस्मात् प्रभवति ? 1
4. क्लिष्टत्वदोष: कुत्र भवति ? 2
5. रसस्य किं स्वरूपम् ? 2
6. स्फुटक्रमात् ध्वनि: कतिविधा भवति ? 2
7. उपादानलक्षणाया: उदाहरणं किम् ? 2
8. "रिक्त: सर्वो भवति हि लघु: पूर्णता गौरवाय" इति सूक्ते: सप्रसङ्ग - भावार्थो लेख्य: । 2
9. यति: कुत्र भवति ? 2
10. कयोश्चिद् **द्वयो:** लक्षणं सोदाहरणं विवेचयत — $1\frac{1}{2} + 1\frac{1}{2} = 3$

    (i) अक्षरसंहति: (ii) प्रतिषेध: (iii) युक्ति: ।
11. उदारतागुणं निरूप्य तदुदाहरणे संगति: विधेया । $1\frac{1}{2} + 1\frac{1}{2} = 3$

**अथवा**

जयदेवानुसारेण श्लेषगुणं निरूपयत ।

12. कयोश्चिद् **द्वयो**रलंकारयो: संगतिपूर्वकं लक्षणोदाहरणे विवेचनीये — $1\frac{1}{2} + 1\frac{1}{2} = 3$

    (i) श्लेष: (ii) अनन्वय: (iii) दृष्टान्त: ।
13. प्रस्तुतोदाहरणेषु **द्वौ** अलंकारौ परिचीय तयो: लक्षणोल्लेखपूर्वकं संगति: प्रदर्शनीया — $1\frac{1}{2} + 1\frac{1}{2} = 3$

    (i) यत्र स्यान्न पुन: शत्रोर्गर्जितं तज्जितं जितम् ।
    (ii) या दातु: सौम्यता सेयं सुधांशोरकलङ्कता ।
    (iii) उल्लसत्पञ्चशाखास्ते राजते भुजभूरुह: ।
14. प्रयोजनभेदेन लक्षणाया: भेदान् सोदाहरणं वर्णयत । 3
15. चन्द्रालोकानुसारेण ध्वनेरेकपञ्चाशद् भेदानां नामानि लिखत । 3
16. अभिधाया: षड्भेदोदाहरणानि वर्णयत । 3
17. केषांचन चतुर्णां दोषाणां लक्षणानि विलिख्य तदुदाहरणेषु संगमयत — $4 \times 1 = 4$

    (i) सङ्कीर्ण: (ii) अभवन्मतयोग: (iii) कथित:
    (iv) अप्रयुक्त: (v) समाप्तपुनरात्तत्वम् (vi) दुष्क्रमत्वम् ।
18. निम्नलिखितालंकारयुग्मेषु **द्वयो:** परस्परं भेद: प्रदर्शनीय: — $2 + 2 = 4$

    (i) वृत्त्यनुप्रास — अर्थानुप्रास:
    (ii) छेकापह्नुति: — भ्रान्तापह्नुति:
    (iii) समासोक्ति: — व्यतिरेक: ।
19. कयोश्चिद् **द्वयो:** स्वरूपोदाहरणे विवेचयत — $2 + 2 = 4$

    (i) वीररस: (ii) शान्तरस: (iii) रौद्ररस: ।

20. निम्नलिखितेषु **द्वयोः** लक्षणं विलिख्य उदाहरणेषु संगमयत — 2 + 2 = 4

(i) तुल्यप्राधान्यम् (ii) असुन्दरम् (iii) काक्वाक्षिप्तम् ।

21. सप्रसंग-व्याख्या कार्या — 5

तं पूर्वाचार्यसूर्योक्तिज्योतिः स्तोमोद्‌गुणं स्तुमः ।
यं प्रस्तूय प्रकाशन्ते मद्‌गुणास्त्रसरेणवः ॥

**अथवा**

जयदेवानुसारेण काव्ये अलंकाराणाम् अनिवार्यता प्रतिपादनीया ।

22. प्रस्तुतश्लोकस्य छन्दोऽलंकार निर्देशपूर्वकं सप्रसंग-व्याख्या कार्या — $\frac{1}{2} + \frac{1}{2} + 1 + 3 = 5$

कश्चित्कान्ताविरहगुरुणा स्वाधिकारात्प्रमत्तः
शापेनास्तंगमितमहिमा वर्षभोग्येण भर्त्तुः ।
यक्षश्चक्रे जनकतनयास्नानपुण्योदकेषु
स्निग्धच्छायातरुषु वसतिं रामगिर्याश्रमेषु ॥

**अथवा**

शब्दायन्ते मधुरमनिलैः कीचकाः पूर्यमाणाः
संसक्ताभिस्त्रिपुरविजयो गीयते किन्नरीभिः ।
निर्ह्रादस्ते मुरज इव चेत्कन्दरेषु ध्वनिः स्या -
त्संगीतार्थो ननु पशुपतेस्तत्र भावी समग्रः ॥

23. कालिदासस्य रचना-परिचयः संक्षेपेण लेख्यः । 5

24. सप्रसंगो भावार्थो लेखनीयः — 1 + 4 = 5

सन्तप्तानां त्वमसि शरणं तत्पयोद प्रियायाः
सन्देशं मे हर धनपतिक्रोधविश्लेषितस्य ।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या ॥

**अथवा**

हित्वा हालामभिमतरसां रेवतीलोचनाङ्कां,
बन्धुप्रीत्या समरविमुखो लाङ्गली याः सिषेवे ।
कृत्वा तासामधिगममणं सौम्य सारस्वतीना
मन्तः शुद्धस्त्वमपि भविता वर्णमात्रेण कृष्णः ॥

25. (क) कयोश्चिद् **द्वयोः** छन्दसोर्लक्षणोदाहरणे विलिख्य संगतिरपि प्रदर्शनीया — 3 + 3 = 6

(i) रथोद्धता (ii) हरिणप्लुता (iii) मंजुभाषिणी ।

(ख) प्रस्तुतोदाहरणे गणनिर्देशपूर्वकं छन्दः परिचीय तल्लक्षणमपि लेखनीयम् — 2

दैत्यानां मुण्डजातैर्हारावली शोभते सा ।